दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-23

1 23.11.2024 शनिवासरः वि.सं. २०८१ मार्गशीर्षकृष्णाष्टमी मार्गशीर्ष 08 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com


## अपराधस्य विरुद्धं प्रशासनस्य "शून्य-सहिष्णुतायाः नीतिः अस्ति- गृहमन्त्री अमितशाहः



हिमसंस्कृतवार्ताः- गृहमन्त्रिणा अमितशाहेन निगदितं यत् अपराधस्य विरुद्धं प्रशासनस्य "शून्य-सहिष्णुतायाः नीतिः अस्ति, तथा च दिल्ल्याः विधि- व्यवस्थायाः स्थितौ कस्यापि प्रकारस्य शैथिल्यम् न स्वीक्रियते इति। गृहमन्त्री दिल्ली-आरक्षकैः सह मेलनं कृत्वा विधि-व्यवस्थायाः स्थितिं समीक्षितवान्। केन्द्रीयगृहसचिवः गोविन्दमोहनः, गुप्तचरविभागस्य निर्देशकः तपन डेकाः दिल्ली-आरक्षि-आयुक्तः, अन्ये च वरिष्ठाः अधिकारिणः अस्याम् सभायां उपस्थिताः आसन्। श्रीशाहः अवोचत् यत् दिल्लीवासिनः पूर्णतया सुरक्षाम् अनुभवन्तु इति प्रत्येकस्य आरक्षकस्य व्यक्तिगतं दायित्वम् अस्ति इति। सः इत्यपि अवदत् यत् बालकानां, महिलानां, वरिष्ठनागरिकाणां च सुरक्षां दिल्ली-आरक्षिबलानां प्राथमिकता भवेत् इति।

## रविवासरे एकादशवादने "मन की बात" इत्यस्मिन कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति प्रधानमन्त्री




हिमसंस्कृतवार्ताः- प्रधानमन्त्री नरेन्द्रमोदी आगामि-रविवासरे एकादशवादने स्वीये "मन की बात" इत्यस्मिन कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। "मन की बात" इति मासिक-कार्यक्रमस्य इदं षोडशाधिक-एकशततम संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणं आकाशवाणी- दूरदर्शनयोः सर्वाभिः वाहिनिभिः प्रसारयिष्यते। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालय-इत्येतेषां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते इति। प्रधानमन्त्रिणः सम्बोधनानन्तरं अनुक्षणं अयं कार्यक्रमः क्षेत्रीय-भाषास्वपि श्रोतुं शक्यते। क्षेत्रीय-भाषासु अस्य पुनः प्रसारणं भविष्यति।

## भारतीयतायाः चेतनया प्रेरिताः नागरिकाः राष्ट्रिय-एकतायाः दीपं स्थापयन्ति-राष्ट्रपतिः द्रौपदीमुर्मुः



हिमसंस्कृतवार्ताः- राष्ट्रपतिः द्रौपदीमुर्मुः विकसितराष्ट्रनिर्मातुं राष्ट्र-प्रथमम् इत्येतस्य दृष्टिकोणस्य स्वीकरणस्य आवश्यकतायाः उपरि अवधानं दत्तवती। हैदराबाद-नगरे लोक-मन्थनस्य चतुर्थं संस्करणं सम्बोधयन्ती राष्ट्रपतिः सबलं प्रतिपदितवती यत् सर्वैः नागरिकैः देशस्य सांस्कृतिकं बौद्धिकं च परम्परां अवगन्तुं, अस्माकं अमूल्यपरम्पराणां सुदृढीकरणं च करणीयम् इति। वैविध्यं देशस्य मूलभूत-एकतायै सौन्दर्यस्य इन्द्रधनुः प्रददाति इति कथयित्वा राष्ट्रपतिः अवदत् यत्, राष्ट्रिय एकतायाः अनुभूतेः कारणात् अनेकप्रतिसन्धिषु अपि देशः एकीकृतः अस्ति इति। राष्ट्रपतिः मुर्मुः स्मारितवती यत् भारतीयसमाजस्य विभाजनं दुर्बलं च कर्तुं शताब्द्याः प्रयत्नः जातः।

## सिंगापुर-दक्षिणकोरिया-मिस्र-अमरीका-स्पेन-देशानां अधिकारिभिः च सह मन्त्रणाम् कृतवान्



हिमसंस्कृतवार्ताः- प्रधानमन्त्री नरेन्द्रमोदी पञ्चदिवसानां नाइजीरिया-ब्राजील-गयाना-देशानां यात्रावधौ अनेकैः विश्व-नेतृभिस्साकम् अनेकानि द्विपक्षीयोपवेशनानि विहितवान्। अत्रावधौ प्रधानमन्त्री एकत्रिंशत्-द्विपक्षीयोपवेशनेषु भागम् अभजत्। अपि च वैश्विकनेतृभिस्सह अनौपचारिकीं वार्तामपि कृतवान्। श्रीमोदी नाइजीरियादेशे एकं ब्राजीलदेशे दश गयानायां च नव द्विपक्षीयोपवेशनानि समनुष्ठितवान्। प्रधानमन्त्री इण्डोनेशियायाः राष्ट्रपतिना प्रबोवो-सुबियान्टो इत्यनेन पुर्तगालस्य प्रधानमन्त्रिणा लुइस-मोंटेनेग्रो इत्यमुना ब्रिटेनदेशीयेन प्रधानमन्त्रिणा कीर-स्टार्मर इत्यनेन चिलीदेशीयेन राष्ट्रपतिना ग्रेबियल-बोरिक इत्यमुना अर्जेन्टीना-देशस्य राष्ट्रपतिना जेवियर-माइली इत्येतेन च सह अनेकानि उपवेशनानि कृतवान्। एतदतिरिच्य असौ सिंगापुर-दक्षिणकोरिया-मिस्र-अमरीका-स्पेन-देशानां विभिन्नानाम् अन्ताराष्ट्रिय-सङ्घटनानां प्रमुखैः अधिकारिभिः च सह मन्त्रणाम् उपवेशनानि च विहितवान्।

## झारखण्डमहाराष्ट्रसहितं केरलसंसदीय-क्षेत्राणाम् अद्य भविष्यति मतगणना

झारखण्ड-महाराष्ट्रयोः विधानसभा निर्वाचनैः सह विभिन्न राज्यानां अष्टचत्वारिंशत्-विधानसभासनानां केरलस्य वायनाड- संसदीयक्षेत्रस्य महाराष्ट्रस्य नांदेड-संसदीयक्षेत्रस्य च उपनिर्वाचनस्य भविष्यमाणायाः मतगणनायाः सर्वाः सज्जताः सम्पूरिताः। मतगणना प्रातः अष्टवादने आरप्स्यते। सर्वप्रथमं प्रैष्य-मतपत्राणां गणना भविष्यति। मतगणना-प्रक्रियायाः सुचारू सञ्चालनाय निर्वाचनायोगेन व्यापकव्यवस्था कृता। विभिन्नराज्यानाम् एकत्रिंशत्-विधानसभासनेषु केरलस्य वायनाड-संसदीयक्षेत्रे च उपनिर्वाचनं नवम्बरमासस्य त्रयोदश- दिनाङ्के अभवत्।



## जापानदेशस्य रक्षामन्त्रिणा जनरल-निकातानि इत्येतेन सह मेलनं कृतवान् रक्षामन्त्री राजनाथसिंहः

रक्षामन्त्री राजनाथसिंहः लाओस देशस्य राजधान्यां वियनतियाने नगरे जापानदेशस्य रक्षामन्त्रिणा जनरल-निकातानि इत्येतेन सह मेलनं कृतवान्। एकस्मिन् सामाजिकसन्देशपटले श्रीसिंहः अवोचत् यत् जनरल-निकातानी इत्यमुना सह तस्य चर्चा समुचितासीत्। विश्वासं च प्रकटितवान् यत् उभयोः देशयोः मध्ये इयं सहभागिता स्वतन्त्र-मुक्त-नियमाधारितं हिन्द- प्रशान्तक्षेत्रं सुनिश्चितुं महत्वपूर्णं भूमिका निर्वक्ष्यति। उभौ पक्षौ देशयोः मध्ये रक्षा-उद्योग-प्रौद्योगिक सहयोगानां महत्वं पुनरावर्तितवन्तौ।

## सुभाषितम्

**आक्रुश्यमानो नाक्रोशेत् मन्युरेव तितिक्षतः।**
***आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति॥**

अर्थात्- दूसरों से गाली सुनकर भी स्वयं उन्हें गाली न दें। गाली सहन करनेवाले का रोका हुआ क्रोध ही गाली देने वाले को जला डालता है और गाली देनेवाले का पुण्य भी ले लेता है।


प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११


## कांग्रेसदलेन मणिपुरस्य-संवेदनात्मक-स्थितिः यथावदेव न संस्थापिता-जेपीनड्डा



भाजपाध्यक्षः जे पी नड्डाः कांग्रेसं प्रति आक्षेपं कृतवान् यत् दलेन मणिपुरस्य-संवेदनात्मक-स्थितिः यथावदेव न संस्थापिता। श्रीनड्डाः मणिपुरस्य हिंसासम्बद्धे कांग्रेसाध्यक्षेण मल्लिकार्जुन खरगे इत्यनेन लिखितस्य पत्रस्य प्रत्युत्तरं राष्ट्रपति-पदासीनायै द्रौपदी-मुर्मु-वर्यायै प्रदत्तवान्। असौ स्वपत्रे लिखितवान् यत् विगत-दशवर्षेषु प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे पूर्वोत्तर क्षेत्रेषु सम्यक्-परिवर्तनं सञ्जातम्। श्रीनड्डा इत्यस्य पत्रस्य प्रत्युत्तरे कांग्रेसनेता जयराममरमेशः कथितवान् यत् मणिपुरस्य जनाः शीघ्रातिशीघ्रं सामान्यस्थितेः, शान्तेः सद्भावस्य च कामनां कुर्वन्ति इति।

# मंडीक्षेत्रस्य परम्परागतफलानि, जैविक-सांस्कृतिकधरोहरान् च संरक्षयितुं कार्यं कुर्वन्तु- आचार्यः ललितकुमारः



हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा

सरदारपटेलविश्वविद्यालये मंडी इत्यत्र इतिहासविभागेन भारतीय- सांस्कृतिक- निधिः (इंटेक) मंडी चेप्टरद्वारा विश्व- धरोहर- सप्ताहस्य उपलक्ष्ये अतिथिव्याख्यानस्य (विरासतचर्चा) आयोजनम् इतिहासविभागे माण्डवपरिसरे जातम्। आचार्यः ललितकुमार अवस्थी कुलपतिः, सरदारपटेलविश्वविद्यालयः मंडी मुख्यातिथिरूपेण उपस्थितः आसीत्। कार्यक्रमस्य अध्यक्षता नरेश मल्होत्रा समन्वयकः इंटेक अकरोत्। आचार्यः अनुपमा सिंह प्रतिकुलपतिः, आचार्यः ललितमल्होत्रा विशिष्टातिथिः, डॉ. तारासेन मुख्यवक्ता आसीत्। कार्यक्रमस्य शुभारम्भे इतिहासविभागस्य सहायकाचार्यः कार्यक्रमसंयोजकश्च डॉ. राकेशकुमारशर्मा सर्वेषां स्वागतं कुर्वन् अवदत् यत् अस्य कार्यक्रमस्य उद्देश्यं मंडीक्षेत्रस्य जैव विविधतानां, परंपराणां, वन्यफलानां च ऐतिहासिकमहत्वस्य जागरणमस्ति। मुख्यातिथिः अवदत् यत् भारतीयसांस्कृतिकनिधेः (इंटेक) स्थापना सांस्कृतिकधरोहरस्य संरक्षणं कर्तुं कृता। सः इंटेक इत्यस्य सर्वेभ्यः पदाधिकारिभ्यः सांस्कृतिकविरासतसम्बन्धे कार्यं कर्तुं शुभकामनाः दत्ताः, भविष्ये च इंटेक- सरदारपटेल विश्वविद्यालयः मंडी मिलित्वा सांस्कृतिकधरोहरैः सह युनां मेलनस्य कार्यं करिष्यन्ति। सः उक्तवान् यत् सरदार पटेल विश्वविद्यालयः मंडी न्यूनातिन्यूनं पञ्च ग्रामान् स्वीकृत्य तत्रस्थानां वन्यफलानां यथा- काफलं हिसालू, आमलकं बेड़ाना इत्यादीनां प्रसंस्करणविषये उक्तवा तेभ्यः आयस्य नवीनस्रोतांसि उत्पादयितुं सहायता करिष्यनति। अनेन कीटनाशकमुक्तानि एतानि फलानि, एतेषाम् उत्पादानां च विषये सर्वे जागरुका भवेयुः, देशस्य सर्वेषु भागेषु च इदं ज्ञानं गच्छेत्। छात्राणां समीपे एतस्य ज्ञानमेव न अपि तु एतेषाम् उपयोग- महत्त्वविषये चापि अवगमनस्य आवश्यकता वर्तते। आयोजकान् वर्धापयन् तेनोक्तं यत् मंडीक्षेत्रस्य जैविक- सांस्कृतिकधरोहरान् च संरक्षयितुम् इदं प्रेरणादायकं चरणं वर्तते। मुख्यवक्तारूपेण उपस्थितः सहायकाचार्यः वनस्पतिविज्ञानं वल्लभ- राजकीय- महाविद्यालयः मंडी डॉ. तारासेन वन्यफलानां औषधीयोपयोगिता ऐतिहासिकसंदर्भाश्च प्रकाशिताः। उक्तं च यत् मंडीक्षेत्रस्य ग्रामीणजीवने वन्यफलानां च गहनमहत्त्वमस्ति। एतानि न केवलं तेषां भोजनस्य भागं, प्राचीनचिकित्साप्रणाल्याम् अपि एतेषां महत्वमस्ति। कार्यक्रमस्य अध्यक्षः नरेश मल्होत्रा वन्यफलानां संरक्षणम् उपयोगं च प्रोत्साहयितुं परामर्शं दत्तं यत् एतदर्थं कार्यकरणस्य आवश्यकता अस्ति। आचार्य अनुपमा सिंह उक्तवती यत् परिवर्तनशीले पर्यावरणीयपरिदृश्ये एतानि दुर्लभफलानि संकटे सन्ति। अतः एतेषां संरक्षणविषये चिंतनं, कार्यं च करणीयम्। अंते इंटेक इत्यस्य सहसमन्वयकः अनिल शर्मा उपस्थितानां सर्वेषां धन्यवादम् अकरोत्। कार्यक्रमे आचार्य राजेशकुमारशर्मा अधिष्ठाता छात्र कल्याणम्, डॉ. अक्षयकुमारः विभागाध्यक्षः भौतिकविज्ञानविभागः डॉ. पवन चाँद विभागाध्यक्षः प्रबंधनविभागः, सहायकाचार्यः डॉ. शिवानः, डॉ. बलबीरः, डॉ. रामपालः, विकेशकुमारः, शोधार्थी राहुल वेदः, इतिहास सोसायटी इत्यस्य अध्यक्षा करीमा, सुभम, अनीष, हुमा सहितम् इतिहासविभागस्य छात्राः, भारतीय- सांस्कृतिक- नीतिः मंडी चैप्टर इत्यस्य सदस्याः ललित कपूरः, राजीव कुमारः, गजेंद्र बहलः, राजीव वैद्यः, बनिता मल्होत्रा, मृदु गोयल, नीरज शर्मा, निशी कपूर हितेश वैद्यश्च उपस्थिताः आसन्

# HP High Court: उच्चन्यायालयात् हिमाचल-सर्वकाराय महदाश्रयः, पर्यटननिगमस्य

## अतिथिगृहाणि ३१ मार्चपर्यन्तम् उद्घाटितानि भविष्यन्ति

हिमसंस्कृतवार्ताः- शिमला।

राज्यसर्वकाराय पर्यटनविकासनिगमाय च हिमाचलप्रदेशोच्चन्यायालयात् महदाश्रयः प्राप्तः। पर्यटनविकासनिगमस्य अतिथिगृहाणि २०२५ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कपर्यन्तम् उद्घाटितानि भविष्यन्ति इति उच्चन्यायालयेन आदेशः दत्तः। राज्यपर्यटनविकासनिगमस्य १८ हानिकारक- अतिथिगृहाणां बन्दीकरणस्य निर्णयस्य विरुद्धं सर्वकारः उच्चन्यायालयं प्राप्तवान्। पर्यटननिगमेन आदेशे संशोधनार्थम् आवेदनं कृतम् आसीत् यत् १८ मध्ये नवातिथिगृहाणि लाभप्रदानि इति। अवश्यं एतेषु अधिवासः ४० प्रतिशतात् न्यूनः अस्ति। उच्चन्यायालयेन एतत् स्वीकृत्य ३१ मार्चपर्यन्तं नवातिथिगृहाणां संचालनस्य अनुमतिः दत्ता अस्ति। शुक्रवासरे न्यायाधीशस्य अजयमोहनगोयलस्य न्यायालये अस्य प्रकरणस्य श्रवणं जातम्। न्यायालयेन उक्तं यत् एतेषां अतिथिगृहाणां विषये १९ नवम्बर् दिनाङ्कस्य आदेशस्य निरन्तरता तदनन्तरं तेषां कार्यप्रदर्शनस्य आधारेण समीक्षा भविष्यति।

शेषाणि अतिथिगृहाणि नवम्बर २५ दिनाङ्कात् पिहिताः एव भविष्यन्ति। अवधेयं वर्तते यत् नवम्बर १९ दिनाङ्कस्य निर्णये न्यायालयेन २५ नवम्बरदिनाङ्कात् ४० प्रतिशतात् न्यूनानि निवासस्थानानि निगमस्य अतिथिगृहाणि पिहितं कर्तुं आदेशः दत्तः आसीत्। पर्यटनविकासनिगमस्य पेन्शनभोक्तृभ्यः आर्थिकलाभान् न दातुं न्यायालयेन आदेशाः निर्गताः आसन्। न्यायालयेन प्रबन्धनिदेशकं ३ दिसम्बर् दिनाङ्के आदेशानां अनुपालनप्रतिवेदनं प्रस्तूय कर्तुम् आह। एतेन सह चतुर्थवर्गस्य मृतानां च कर्मचारिणां सूची अपि आहूता अस्ति। पूर्वं १२ नवम्बर दिनाङ्के निर्गतेषु आदेशेषु न्यायालयेन २०२२ तः २०२४ पर्यन्तं होटलानाम् आयस्य विवरणं प्रबन्धनिदेशकात् प्राप्तम् आसीत्।

## एतानि हिमाचलपर्यटनविकासनिगमस्य अतिथिगृहाणि ३१ मार्चपर्यन्तं उद्घाटितानि भविष्यन्ति।

### एतानि अतिथिगृहाणि पिहितानि न भविष्यन्ति

1. द पैलेस होटेल चायल
2. होटल चन्द्रभागा केलांग
3. होटल देवदार खज्जियार
4. होटल मेघदूत, क्यारीघाट
5. होटल लॉग हट्स मनाली
6. होटल कुञ्जम मनाली
7. होटल भागसु मैकलोडगंज
8. द कैसल होटेल नग्गर
9. होटल धौलाधार धर्मशाला




## पर्यटननिगमस्य अतिथिगृहाणां वर्तमानस्थित्यै पूर्वसर्वकारः अपि उत्तरदायी

पर्यटननिगमस्य १८ अतिथिगृहाणां बन्दीकरणस्य निर्णये नरेशचौहानः अवदत् यत् अस्मिन् विषये राज्यसर्वकारेण राज्योच्चन्यायालये स्वस्य स्थापनं प्रस्तुतम्। फलतः निगमस्य नव अतिथिगृहाणि पुनः उद्घाटयितुम् आदेशाः दत्ताः। निगमस्य अन्येषु अतिथिगृहेषु अपि अध्ययनं क्रियते। अस्मिन् विषये निर्मितसमित्याः प्रतिवेदनम् आगत्य समुचितपदानि क्रियन्ते। पर्यटननिगमस्य अधिकारिणां, कर्मचारिणां, हितधारकाणां च हितं पूर्णतया सुरक्षितम् अस्ति, तेषां भयस्य आवश्यकता नास्ति।

# मुख्यसंसदीयसचिवप्रकरणे उच्चत्तमन्यालयात् महदाश्रयः, विधायकपदे स्थास्यन्ति षड्पूर्वमुख्यसंसदीयसचिवाः



हिमसंस्कृतवार्ताः - देवराजः, शिमला।

हिमाचलप्रदेशसर्वकाराय मुख्यसंसदीयसचिवप्रकरणे (सीपीएस) उच्चत्तमन्यालयात् महदाश्रयः अमिलत्। पूर्वमुख्यसंसदीयसचिवाः (सीपीएस) स्वपदे अर्थात् विधायकत्वेन स्थास्यन्ति। उच्चत्तम न्यालयस्य आदेशानुसारं मुख्यसंसदीयसचिवाः विधायकत्वेन अयोग्याः न भविष्यन्ति। एतेषु उच्चन्यालयस्य निर्णयस्य पञ्चाशतमः अनुच्छेदः स्वीकृतः न भविष्यति। प्रकरणे शीर्षन्यालयः राज्यसर्वकारं चतुर्दशदिनानाम् सूचनापत्रं (नोटिस) दत्तम्। उच्चत्तमन्यालये प्रकरणस्य अग्रिमं श्रवणं जनवरीमासस्य विंशतिः दिनाङ्के भविष्यति। मुखयन्यायाधीशस्य खण्डपीठेण प्रकरणस्य श्रवणं कृतम्। हिमाचलप्रदेशस्य मुख्यसंसदीयसचिवानां विधिनासम्बन्धित पृथक्-पृथक् याचिकायाम् उच्चत्तमन्यालये श्रवणं जातम्। हिमाचलसर्वकारपक्षतः अस्मिन् प्रकरणे वरिष्ठाधिवक्ता कपिलसिब्बलः अभिषेक मनुसिंघवी च पक्षमुपस्थापयन्तः सन्ति। उच्चन्यालयस्य निर्णयस्य अनुच्छेदस्य (पैरा) पञ्चाशतानुसार विधायकानाम् सदस्यता समाप्ता भवितुमर्हति स्म, परञ्च अधुना उच्चत्तमन्यालयस्य निर्णयानुसारं विधायकाः स्वपदे आसीनाः भविष्यन्ति।

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
3
23.11.2024 शनिवासरः वि.सं. २०८१ मार्गशीर्षकृष्णाष्टमी मार्गशीर्ष 08 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com


# हिमाचलस्य कुल्लूजनपदे नव किलोग्राम परिमितं चरसः इति पुलिसद्वारा गृहीता



हिमसंस्कृतवार्ताः कुल्लू।
कुल्लूजनपदे पुलिसद्वारा महती चरस इति अधिगृहीता। द्वौ जनौ अपि गृहीतौ। कुल्लू मंडलस्य पुलिस अधीक्षकः डॉ. कार्तिकियन गोकुलचन्द्रनः उक्तं यत् भुन्तर पुलिसस्थानस्य दलं गश्ते नाकाबन्धां च स्थितमासीत्। अस्मिन्नेव समये नवदुर्गा पाषाणकुट्टकस्य समीपे हुरलायां गश्तसमये द्वयोः जनयोः समीपात् नवकिलोग्राम- सप्ततिग्रामचरसः गृहीता।
एसपी महोदयेन उक्तं यत् चरसः सहितं गृहीतौ जनौ 30 वर्षीयः डीने रामः (निवासी नौण, डाकगृहं ब्रैहिन, तहसीलः सैंज, कुल्लू), 30 वर्षीयः ईशर सिंहः (निवासी पूखरी, डाकगृहं ब्रैहिन, तहसीलः सैंज, कुल्लू) इत्याख्यौ स्याताम्। एतेषु विरुद्धं भुन्तर पुलिसस्थानस्य अधीनं मादकपदार्थनियंत्रणाधिनियमस्य धारा 20 अन्तर्गतं प्रकरणं प्रवृत्तमस्ति। उभौ नियमानुसारं गृहीतौ च। उभौ न्यायालये प्रस्तुत्य पुलिस हिरासतं प्राप्य रिमाण्डं साध्यं भविष्यति। अस्य प्रकरणस्य अन्वेषणं प्रगतिमार्गम् अस्ति।

# पर्वतानां सम्राज्ञी शिमला इत्यत्र पर्यटकाः समागताः, रिजप्रांगणे अश्वारोहणस्य आनन्दः प्राप्तः

हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेशस्य राजधान्याः शिमलायां सप्ताहान्ताय सैलानिनः अधिकसंख्यया समागताः। शुक्रवासरे सैलानिनः नगरस्य ऐतिहासिके रिजप्रांगणे मालरोडे च सुखम् अनुभवन्। अस्मिन् काले अनेकैः सैलानिभिः रिजे अश्वारोहणस्य आनन्दः लब्धः। सैलानिनः रिजे स्थितपर्वतानां सौन्दर्यं दृष्ट्वा विस्मयमुद्रिन्तः आसन्। अनेकैः प्रसिद्धं जाखु हनुमानमन्दिरं च प्राप्तम्।



# हिमाचलप्रदेशस्य पञ्चसु जनपदेषु वर्षा-हिमपातस्य सम्भावना।



हिमसंस्कृतवार्ताः शिमला। पश्चिमीय विक्षोभस्य सक्रियतया हिमाचलप्रदेशस्य पञ्चसु जनपदेषु वर्षा- हिमपातस्य सम्भावना वर्तते। मौसमविज्ञानकेन्द्रस्य शिमलायाः अनुसारं 23 नवम्बरदिने चंबा, कांगड़ा, किन्नौर, लाहौल स्पीति, कुल्लू जनपदेषु उच्चभूप्रदेशेषु वर्षा- हिमपातश्च भविष्यति। अन्येषु भागेषु सप्तदिनेषु वायुमानं शुष्कं भविष्यति इति संकेतितम्।

## तापमानस्य पतनं सम्भाव्यते

वर्षा- हिमपातस्य स्थितौ प्रदेशे न्यूनतमं च अधिकतमं च तापमानं आगामी त्रि-चतुर्दिनेषु 1-2 डिग्री सेल्सियस पर्यन्तं पतिष्यति। शुक्रवारदिने भाखड़ा बन्धक्षेत्रे (बिलासपुरे), सुन्दरनगरप्रदेशे च धूम अभवत्। विभागेन भाखड़ाबन्धस्य जलाशयक्षेत्रेषु, बल्हघाट्याः (मण्डी) कतिपयभागेषु 25 नवम्बरपर्यन्तं प्रातः सायंकाले च गहनधूमस्य पीत सचेतना (यलो अलर्टः) प्रदत्तः।

## कस्मिन् स्थले कियत् न्यूनतमं तापमानं?

उच्चभूप्रदेशेषु शीतलहरः सततम् अनुभूयते। चतुर्षु स्थलेषु न्यूनतमं तापमानं ऋणाङ्के (माइनस) दत्तम् अस्ति। शिमलायाः न्यूनतमं तापमानं 8.2, सुन्दरनगरे 5.5, भुंतरे 3.5, कल्पायाम् 0.2, धर्मशालायाम् 9.0, ऊनायाम् 5.3, नाहने 10.0, केलांगे -2.0, पालमपुरे 6.2, सोलने 4.8, मनाल्यां 2.8, कांगड़ा इत्यत्र 7.6, मण्ड्यां 6.0, बिलासपुरे 7.4, हमीरपुरे 6.5, चंबायां 6.7, डलहौस्यां 8.1, कुफर्यां 7.3, कुकुमसेरी -4.1, नारकण्डायाम् 4.5, भरमौरे 6.5, रिकांगपिओ 3.0, सेऊबागे 2.8, धौलाकुआं 8.9, बरठीं 5.0, समदो -1.3, कसौल्यां 9.0, ताबो -8.7, सैंज 5.4, बजौरा 5.2 डिग्री सेल्सियस इति निबद्धम्।

# पूर्वीचम्पारण्ये आगामियोजना विषयिणी गोष्ठी सम्पन्ना



हिमसंस्कृतवार्ताः- गोपालकृष्णमिश्रः, प्रान्तसोशलमीडियाप्रमुखः, संस्कृतभारती- बिहारप्रान्तः। संस्कृतभारती-बिहारप्रान्तस्य प्रान्त-सङ्घटन-मन्त्री डॉ. श्रवणकुमारमहोदयः पूर्वीचम्पारण्यजनपदस्य मोतिहारीनगरे विगतदिवसे गोष्ठीं स्वीकृतवान्। अत्र गोष्ठ्यां संस्कृतभारत्याः कार्यकर्तृणां संस्कृतानुरागिणाञ्च उपस्थितिः आवश्यकी आसीत्। गोष्ठ्याम् आहत्य १२ जनाः उपस्थिताः आसन्, यस्यां विस्तारकवर्गविषये, शिविरचालक-अभ्यासवर्गविषये वार्ता अभवत्। अस्यां गोष्ठ्यां मोतिहारीनगरस्य नगरमन्त्रिणः डॉ. विश्वजित् बर्मनमहोदयस्य प्रान्त-सोशलमीडिया-प्रमुखस्य गोपालकृष्णमिश्रस्य अपि उपस्थितिः आसीत्। सङ्घठनमन्त्रिणा साकं मुजफ्फरपुरस्य जिलासंयोजकः अखिलेशः अपि आगतवान् आसीत्। इतोऽपि ताराकान्तमित्रः, अरविन्दतिवारी, बलिरामः, श्यामसुन्दरः, लालू, प्रत्यूषः, यशवन्तः, निखिलः चक्रवर्ती उपस्थिताः आसन्।

## गोष्ठ्यामस्यां चर्चितेषु विषयेषु एवं कार्यकर्तारः स्वदायित्वविषये अङ्गीकारं कृतवन्तः –

**आशास्पदविस्तारक-प्रशिक्षणवर्गार्थम् -**
१. श्रीमान् यशवन्तकुमारः (स्नातकतृतीयवर्षे)
२. श्रीमान् निखिलः चक्रवर्ती (स्नातकतृतीयवर्षे)

- **शिबिरसञ्चालनवर्गार्थम्-**

१. श्रीमान् अरविन्दः तिवारी (बीपीएससी शिक्षकः)
२. श्रीमान् बलिरामः (स्नातकोत्तर-द्वितीयवर्षे)
३. श्रीमान् श्यामसुन्दरः (स्नातकतृतीयवर्षे)

- **संस्कृतविकासवर्गार्थम् -**

१. अभिषेकः/ लालू (द्वादशीकक्षायाम्)
२. प्रत्यूषः (स्नातकतृतीयवर्षे)

गोष्ठीस्वीकरणात् पूर्वं सङ्घटनमन्त्री डॉ. श्रवणकुमारः महोदयः पूर्वीचम्पारण्यजनपदस्य अध्यक्षेण प्रो. रामनिरञ्जन-पाण्डेयमहोदयेन सह मेलनं कृतवान्। यत्र अध्यक्षैस्साकम् एवं विषयाः चर्चिताः-
१. उपाध्यक्षस्य, जिलामन्त्रिणः, नगरमन्त्रिणाञ्च नियुक्तिः वार्ता कृत्वा यथाशीघ्रं भवेत्।
२. जिलानगरयोः समितेः निर्माणं भवेत्।
३. मासिकी एका गोष्ठी निश्चयेन भवेत्।
४. दिसम्बरमासे जनपदनगरयोः विस्तारनिमित्तं प्रान्तसङ्घटनमन्त्रिणः डॉ. श्रवणकुमारमहोदयस्य जिलाध्यक्षमहोदयेन प्रवासः स्वीकृतः।
सोशलमीडियाप्रमुखेन गोपालकृष्णमहोदयेन उक्तं यत् नवम्बरमासान्ते आशास्पदविस्तारकानां वर्गः गयानगरे भविष्यति, दिसम्बरमासे शिबिरचालकप्रशिक्षणवर्गः भविष्यति यत्र बिहारप्रान्ततः अपेक्षिताः कार्यकर्तारः तस्मिन् वर्गे प्रशिक्षणं प्राप्स्यन्ति इति। सोशलमीडियाप्रमुखः उक्तवान् यत् संस्कृतभारत्याः बिहारप्रान्तेन अग्रे गीताजयन्तीमुपलक्ष्यापि आभासीयं श्रीमद्भगवद्गीतायाः अष्टादशाध्यानां पारायणं दिसम्बरमासस्य ११तमे दिनाङ्के भविष्यति इति।

**"वन्दे संस्कृतमातरम्"**
**"लौकिकन्यायकोशः" (१०१)**
**"मूषासिक्तताम्रन्यायः"**

मूषा नाम तादृशं यन्त्रं स्थापितं यस्मिन् यत्र ताम्रादि धातुद्रवपदार्थः अभीष्टाम् आकृतिं प्राप्नोति। मूषास्थापितः द्रवपदार्थः किञ्चित्कालानन्तरं शीतलः भवति। तदा तस्य मूषायाः आकृतिः तथैव चित्तं रूपादिविषयान् व्याप्नोति। तत् स्वस्य विषयं कृत्वा स्वयं तदाकारं भवति अन्ते।

हिमसंस्कृतवार्ताः

यथा-
"मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा।
रूपादीन् व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवम्।।"

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/महाराष्ट्रम्**

# पटियालानगरे संस्कृतभारतीपञ्जाबस्य कार्यकर्तृसम्मेलनम्




**हिमसंस्कृतवार्ताः**सम्मेलने सम्पूर्णपंजाबतः चतुर्शतासन्नाः कार्यकर्तारः भागं गृहीतवन्तः विगतशनिरविवासरयोः संस्कृतभारतीपञ्जाबस्य प्रान्तसम्मेलनं पटियालानगरे सम्पन्नम् अभवत्। सम्मेलने सम्पूर्णपंजाबस्य विविधनगरेभ्यः चतुर्शतासन्नाः जनाः कार्यकर्तारश्च भागं गृहितवन्तः। सम्मेलनस्य अस्य उद्घाटनसत्रे संस्कृतसंवर्धनप्रतिष्ठानस्य निदेशकः डॉ. चान्दकिरणसलूजा मुख्यवक्ता रूपेण समुपस्थितः। सलूजामहोदयः स्वसम्बोधने संस्कृतभाषायाः महत्त्वस्य विषये विस्तरेण चर्चां कृतवान्। वर्तमानकाले संस्कृतभाषायाः उपयोगिता, राष्ट्रीय-शिक्षा-नीत्यां संस्कृतस्य स्थानं च सम्बोधनस्य मुख्यविषयाः आसन्। सारस्वत-अतिथिः रूपेण सम्प्राप्तः उत्तरक्षेत्रस्य सम्पर्कप्रमुखः डॉ. जोगेन्द्रकुमारेण स्वसम्बोधने उक्तं यत् संस्कृतभारती संस्कृतभाषां जनसामान्यस्य भाषां निर्मातुं प्रयासरतः अस्ति। वयं निश्चयेन एकस्मिन् दिवसे सफलं भविष्यामः। पटियाला अर्बन एस्टेट फेज-1 स्थितस्य शिवमन्दिरस्य समित्याः प्रधानः डीसी गुप्ता विशिष्टातिथिभाषणे पंजाबप्रान्ते संस्कृतस्य वर्तमानकाले दशा विषये चिन्तां प्रदर्शितवान्। सम्मेलने विभिन्नेषु सत्रेषु संस्कृतभाषायाः पंजाबप्रान्ते संवर्धनं कथं भवेत्, विषयं मधिकृत्य गूढतया चिन्तनं जातम्। सम्मेलने सांस्कृतिककार्यक्रमाः अपि आयोजिताः। सास्कृतिक-कार्यक्रमेषु गिद्धानृत्यं, भांगड़ानृत्यं, गीतापाठं, स्तोत्रगानं नृत्यं, संस्कृतगीतानि च अनेकविधकार्यक्रमाः जाताः। कार्यक्रमस्थले विज्ञान-प्रदर्शिनी, वस्तुप्रदर्शिनी नगरीयजनेभ्यः विशिष्टं आकर्षणम् आसीत्। समापनसमारोहे संस्कृतभारत्याः मुख्यवक्ता रूपेण समुपस्थितः उत्तरक्षेत्रस्य संगठनमन्त्री नरेन्द्रकुमारः उक्तं यत् संस्कृतेन विना भारतीयभाषाणाम् अपि उन्नतिः असम्भवम् एव अस्ति। भाषाणां पोषणसामर्थ्यं संस्कृतभाषायाम् एव अस्ति। भारतीयसंस्कृतेः रक्षार्थं संस्कृतभाषायाः महती आवश्यकता वर्तते। मुख्यातिथिः कैप्टन-जगदीश-अटवालः आसीत्। अटवालमहोदयेन उक्तं यत् गुरवाणीं अवगन्तुम् अपि संस्कृतभाषायाः आवश्यकता भवति एव। तत्र अनेकाः शब्दाः संस्कृतनिष्ठाः सन्ति। प्रान्ताध्यक्षः डॉ. वीरेन्द्रकुमारः सर्वेषां धन्यवादं कृतवान्। अध्यक्षमहोदयः उक्तं यत् संस्कृतभारती पञ्जाबप्रान्ते संस्कृतस्य प्रचाराय प्रसाराय च कृतसङ्कल्पः अस्ति। तेन एतत्कार्यक्रमं सफलीकर्तुं सहायताकर्त्रीणां विविधसंस्थानामपि धन्यवादः कृतः। अस्मिन् अवसरे संस्कृतभारती पञ्जाबस्य पूर्वाध्यक्षः डॉ. हर्षमेहता, प्रान्त मन्त्री संजीव श्रीवास्तवः, सहमन्त्री अजय आर्यः, पटियाला विभागसहसंयोजकः डॉ. ओमनदीपशर्मा, प्रान्तप्रचारप्रमुखः डॉ. उदयन-आर्यः पटियालाजनपदस्य अध्यक्षः आचार्यः निगमस्वरूपः, उपाध्यक्षः आचार्यः गुरदासः, पटियाला जिलामन्त्री गगनदीपः पाठकः, जिलासम्पर्कप्रमुखः डॉ. रविदत्तः, जिलाशिक्षणप्रमुखः डॉ. राहुलः, मक्खनलालः इत्यादयः नगरगणमान्याः जनाः उपस्थिताः आसन्

# हास्यकणिका



पत्नी- पश्यतु, भवता आनीतेन प्रक्षालफेनकेन अहं शाटिकां क्षालितवती। अधुना सा लघुतरा जाता। किं कुर्याम्?
पतिः- तेनैव प्रक्षालफेनकेन त्वमपि स्नानं कुरु। तदा शाटिकानुरूपा त्वमपि लघुतरा भविष्यति।
इत्युक्त्वा तस्याः पतिः कुत्रापि न लभ्यते स्म।

## वेदोच्चारणे उदात्तादीनाम् अभिज्ञानं सुकरम्। एतान् उदात्तादीन् वेदपुस्तकेषु इत्थं प्रदर्शयन्ति। यथा----

(१) **उदात्तः**- अक्षराणाम् अधस्ताद् उपरिष्टाद् वा कापि रेखा न भवति।
यथा- अ इ उ....
(२) **अनुदात्तः**- अक्षराणाम् अधस्ताद् - एषा रेखा भवति।
यथा- अ॒ इ॒ उ॒....
(३) **स्वरितः**- अक्षराणाम् उपरिष्टाद् । एषा रेखा भवति।
यथा- अ॑ इ॑ उ॑

स्पष्टप्रतिपत्तये यजुर्वेदे प्रदश्यते।
नम॑स्तेरुद्रम॒न्यव॑ऽउ॒तोत॒ऽइष॑वे॒नमः॑।
बा॒हुब्भ्या॑मु॒तते॒नमः॑।। वसिष्ठःव्यासः

# भयानकहास्यचलच्चित्रे 'कृतिसेननः' इत्यस्याः प्रवेशः



**हिमसंस्कृतवार्ताः- जगदीश डाभी (नव देहली)**
अद्यत्वे भयानकहास्यचलच्चित्रेषु जनानां बहु उत्तमं प्रतिसादः प्राप्यते। जनाः भयानकहास्यचलच्चित्रं रोचन्ते। सद्यः एव प्रदर्शितस्य भयानकहास्यचलच्चित्रस्य स्त्री 2 इत्यस्य ८५० कोटिरूप्यकात् अधिकं धनं प्राप्तम् आसीत् । भयानकहास्यचलच्चित्रस्य वर्धमानं लोकप्रियतां दृष्ट्वा आनन्द एल रायः अपि भयानकहास्यचलच्चित्रं निर्मातुम् गच्छति। आनन्द एल रायः इत्यस्य भयानकहास्यचलच्चित्रे कृति सेननः मुख्यभूमिकायां दृश्यते। कृतिः अस्य चलच्चित्रस्य हस्ताक्षरं कृतवती अस्ति । अस्य चलच्चित्रस्य नाम 'नई नवेली' इति । यद्यपि एतत् चलच्चित्रस्य अस्थायी नाम अस्ति । प्राप्तवार्तानुसारं आनंद एल रायः तथा कृतिसेननः इत्येतयोः भयानकहास्यचलच्चित्रस्य चित्रोतलनं २०२५ तमे वर्षे आरभ्यते ।

# गौरी-अक्षतौ अन्तर्राष्ट्रियस्तरे शैक्षाणिकभ्रमनार्थं चयनितः



**हिमसंस्कृतवार्ताः।** श्रीमती शैलबाला राजकीय-आदर्श-वरिष्ठ-माध्यमिकविद्यालय-बलद्वाराक्षेत्रस्य, गौरी, अक्षतः च द्वौ तेजस्वी छात्रौ स्वस्य परिश्रमस्य उत्तमप्रदर्शनस्य च आधारेण अन्तर्राष्ट्रीयप्रकटीकरणकार्यक्रमाय चयनं कृत्वा विद्यालये पुरस्कारं आनयत्। बोर्डपरीक्षायां तेषां उत्तमं प्रदर्शनं, योग्यतासूचौ स्थानं प्राप्तुं च एतत् चयनम् आसीत् । एषा उपलब्धिः तेषां विदेशेषु शैक्षिकव्यावसायिककौशलस्य परिष्कारस्य सुवर्णमयः अवसरं प्रदास्यति। छात्राणां अभिनन्दनं कुर्वन्ती विद्यालयस्य प्राचार्या श्रीमती शकुन्तला ठाकुरः अवदत् यत्, "गौरी-अक्षतयोः परिश्रमेण समर्पणेन च एषा सफलता प्राप्ता। विद्यालयः क्षेत्रं च स्वसाधनायाः गर्वं अनुभवन्ति। अस्य छात्रचयनस्य कारणेन विद्यालये क्षेत्रे च सुखस्य वातावरणं वर्तते। अस्याः उपलब्धेः विषये शिक्षकाः, अभिभावकाः, सहछात्राः च गौरवं प्रकटयित्वा तस्य उज्ज्वलभविष्यस्य कामनाम् अकरोत् ।

# ज्ञानप्रश्नोत्तरी

**डॉ.विवेकः, जोगिन्दरनगरम्**

## सामान्यज्ञानम्

प्रश्नः 1. क्षेत्रफलदृष्ट्या सर्वातिविशालः देशः अस्ति?
उत्तरम्- रूसः।
प्रश्नः 2. सौरमण्डलस्य सर्वातिबृहदः ग्रहः कः?
उत्तरम्- बृहस्पतिः।
प्रश्नः 3. सौरमण्डले सर्वातिलघुः ग्रहः कः?
उत्तरम्- बुधः।
प्रश्नः 4. केरल राज्यस्य राजधानी का?
उत्तरम्- तिरुवनन्तपुरम्।
प्रश्नः 5. जापान देशस्य राजधानी का?
उत्तरम्- 'टोक्यो'

## संस्कृतज्ञानम्

प्रश्नः 1. **सूर्य + उदयः** इति पदस्य सन्धिः किम्?
उत्तरम्- सूर्योदयः।
प्रश्नः.2 **व** इत्यस्य उच्चारणस्थानं किम्?
उत्तरम्- दन्तोष्ठः।
प्रश्नः 3. यथाशक्तिः (शक्तिम् अनतिक्रम्य) इत्यत्र कः समासः?
उत्तरम्- अव्ययीभाव समास।
प्रश्नः 4. 'देवेषु' इत्यस्य पदपरिचयं देयम्।